# 2021

## SANSKRIT — GENERAL

### Paper : SEC-A-2

### (Basic Elements of Āyurveda)

### Full Marks : 80

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

1. अधोलिखितेषु ***पञ्च प्रश्नाः*** समाधेयाः (संस्कृतभाषया देवनागरीलिप्या च)। 2×5

(a) वाग्भटेन विरचितश्य ग्रनथद्वयस्य नाम लिख्यताम्।

(b) कौमारभृत्यं किम्? अङ्गेऽश्मिन् कस्यचिद् वैद्यकस्य नाम लिख्यताम्।

(c) शल्यचिकित्सायाः प्रधानग्रन्थस्य नाम लिख्यताम्। ग्रन्थस्यास्य कः सङ्कलकः?

(d) अगदतन्त्रस्य प्रसिद्धयोः कयोश्चिद् द्वयोः ग्रन्थयोः नाम लिख्यताम्।

(e) भैषजसूक्तं कुत्र उपलभ्यते? सूक्तस्यास्य प्रतिपाद्य विषयः उल्लेखनीयः।

(f) चरकसंहितायाः कति विभागाः कति अध्यायाश्च सन्ति?

(g) "रसरत्नसमूच्चयः" "योगसारः", इति ग्रन्थद्वयस्य लेखकयोः नामोल्लेखं कुरु।

(h) आयुर्वेदे कति अङ्गानि सन्ति? तेषु प्रथमद्वयस्य नामोल्लेखं कुरु।

2. अधस्तनेषु कयोश्चिद् ***द्वयोः*** परिचयः लेख्यः। 5×2

(a) धन्वन्तरिः।

(b) भावमिश्रः।

(c) माधवकरः।

(d) चक्रपाणिदत्तः।

3. अधोलिखितेषु केषाञ्चित् ***त्रयाणां*** बङ्गभाषया आङ्गलभाषया वा अनुवादः क्रियताम्। 5×3

(a) विघ्नमूता यदा रोगाः प्रादुर्भूताः शरीरिणाम्।
तपोपवासाध्ययनब्रह्मचर्य्यव्रतायुषाम्।।

(b) धर्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमम्।
रोगास्तस्यापहर्तारः श्रेयसी जीवितस्य च।।

**Please Turn Over**

(c) तस्यायुष; पुण्यतमो वेदो वेदविदां मतः।
वक्ष्यते यन् मनुष्याणां लोकयोरुभयोर्हितम्॥

(d) हेतुलिङ्गौषधज्ञानं स्वस्थातुरपरायणम्।
त्रिसूत्रं शाश्वतं पुण्यं बुबुधे यं पितामहः॥

(e) दीर्घं जीवितमन्विच्छन् भरद्वाज उपागमत्।
इन्द्रमुग्रतपा बुद्ध्वा शरण्यममरेश्वरम्॥

**4.** संस्कृतभाषया देवनागरीलिप्या च अधोलिखितयोः ***एकस्य*** श्लोकस्य व्याख्या कार्या। 7×1

(a) शरीरेन्द्रियसत्वात्मसंयोंगो, धारि जीवितम्।
नित्यगश्चानुबन्घश्च पर्यायैरायुरुच्यते॥

(b) सत्त्वमात्मा शरीरं च त्रयमेतत्त्रिदण्डवत्।
लोकस्तिष्ठति संयोगात्तत्र सर्वं प्रतिष्ठितम्॥

**5.** ***द्वयोः*** टीका लेख्या (संस्कृतभाषया देवनागरीलिप्या च)। 4×2

(a) आयुर्वेदे पञ्चमहाभूतम्

(b) आयुर्वेदसम्मतं पञ्चकर्म

(c) आयुर्वेदे त्रिदोषः

(d) आयुर्वेदे हेतुत्रयम्

(e) साध्यरोगः

**6.** प्रश्नोद्धृतान् मन्त्रान् विहाय तैत्तिरीयोपनिषदः स्वाभिमतं कमप्येकं मन्त्रं लिखत (देवनागरीलिप्या च)। 10

**7.** अधोलिखितेषु कयोश्चिद् ***द्वयोः*** मन्त्रयोः वङ्गभाषायाम् आङ्गलभाषायां वा अनुवादः करणीयः। 5×2

(a) सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै। तेजस्विनावधीतमस्तु मा विद्विषावहै।

(b) प्राणं देवा अनु प्राणन्ति। मनुष्याः पशवश्च ये। प्राणो हि भूतानामायुः। तस्मात्सर्वायुषमुच्चते।

(c) अन्नं न निन्द्यात्। तद्व्रतम्। प्राणो वा अन्नम्। शरीरमन्नादम्। प्राणे शरीरं प्रतिष्ठितम्।

**8.** तैत्तिरीयोपनिषदः भृगुवल्लीभागे समालोचितानां विषयाणां स्वभाषया संक्षेपेण विवरणं लिख्यताम् (संस्कृतभाषया देवनागरीलिप्या च)। 10

***अथवा***

संस्कृतभाषया देवनागरीलिप्या च अधोलिखितयोः ***अन्यतरस्य*** व्याख्या सप्रसङ्गं क्रियताम्ः।

(a) यथापः प्रवता यन्ति। यथा मासा अहर्जरम्। एवं मां ब्रह्मचारिणः।

(b) अहं वृक्षस्य रेरिवा। कीर्तिः पृष्ठं गिरेरिव। ऊर्ध्वपवित्रो वाजिनीव स्वमृतमस्मि।

---